International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(5): 49-50
© 2024 IJMH
www.themultijournal.com
Received: 18-12-2024
Accepted: 26-12-2024
Publish : 28-12-2024

**नलिनाक्ष पण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, 517507.

**Correspondence:**
**नलिनाक्ष पण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, 517507.

# "आचार्यसम्पदानन्दमिश्रमहोदयस्य संस्कृतं प्रति योगदानम्"

**नलिनाक्ष पण्डा**

**DOI:** https://doi.org/10.5281/zenodo.20679336

**✯ निबन्धसारः**
आचार्यसम्पदानन्दमिश्रमहोदयः स्वयं वाग्मी, योगीनः अरविन्दस्य मातुः च भक्तः। अरविन्दस्य रचनैः प्रभावितः स्वयं भारतीयसंस्कृतेः प्रचारकः, आध्यात्मिकतत्वाध्यापकः वर्तते। वाग्मित्वात् वैदेशिकैरपि बहुकृत्वः आहुतः सत्कृतश्च। अमेरिका संयुक्तराष्ट्रेषु(USA) अनेकाः कार्यशालाः गोष्ठीश्च अधुनापि योजयति। प्रधानवक्तृषु पाश्चात्यविद्यालयेषु अन्यतमो वर्तते। Trinidad and Tobago विश्वविद्यालयैः आहूतः सांस्कृतिकान् आध्यात्मिकान् विषयान् अरविन्दोक्तदिशा प्रचारविषयान् कृतवान्। आध्यात्मिकप्रचारको भुत्वा वासिष्ठकाव्यकण्ठगणपतिमुनेः कृतीः सम्पाद्य द्वादशसंख्यकग्रन्थरूपेण प्रकाशिकवान्। उत्कलविश्वविद्यालये **"संस्कृत मानववाग्विकासः"** इति विषये शोधनिबन्धोऽपि समर्पितः स्वर्णपदकपुरस्कारेण सत्कृतश्च।

**✯ कुञ्चिकाशब्दाः –**
- संस्कृतम्
- बालसाहित्यम्
- योगदानम्

## ▪ प्रस्तावना

सांख्यमते सृष्टिकारिकायाः मायायाः शक्तिद्वयं भवति। आवरणशक्तिः विक्षेपशक्तिश्च। आवरणशक्तिः ब्रह्मणः स्वरूपमावृत्य अज्ञाने पातयति। विक्षेपशक्तिः सत्यं ज्ञानम् अपहृत्य सत्यत्व भ्रान्तिं जनयति। विक्षेपशक्त्या प्रपञ्चस्य महच्चित्रं दृष्टं भवति। आवरणशक्तेरपि भेदद्वयं भवति। यथा - 1.असत्वापादकशक्तिः, 2.अभानापादकशक्तिः च। तत्र द्वितीयया ब्रह्मणः भानं(प्रकाशः) न भवति। असत्वापादकशक्त्या ब्रह्म अस्ति वा न वा इति सन्देहो भवति। एवमावरणविक्षेपरूपशक्तिद्वयेन सच्चिदानन्दात्मकस्य परब्रह्मणः मुख्यतया सदंशस्य ज्ञानमेव भवति। कदाचित् चिदंशस्य पूर्णपरिपाके आनन्दांशस्य च ज्ञानं भवति। एवं च दृश्यं सर्वं सदंशरूपं वाक् चित् शक्तिः वाग्देव्या आनन्दांशः उदेति। परब्रह्मणः ज्ञानात् किञ्चित् ऊनं ज्ञानमानन्दात्मकं कदाचित् अनुभूयते। तादृशानन्दस्य प्रदाने साधनद्वयं मुख्यं भवति। लोके सः आनन्दः रसानन्दः इत्यपि व्यवह्रियते। रसशब्दस्य परमात्मा इत्यर्थः उपनिषत्सु रूढः। लोके आस्वादादि अनेकार्थाः प्रसिद्धाः एव।

आत्मज्ञानसदृश रसानन्द साधनाय मार्गद्वयं वर्तते। एको मार्गः सङ्गीतं, द्वितीयं साहित्यम्। द्वाभ्यां हीनः पुछविषणाहीनः पशुरिति शास्त्रकारः भर्तृहरिः स्पष्टम् उक्तवान्।

**"साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।"**[1]

अपि च -

**सङ्गीतं चैव साहित्यं सरस्वत्याः स्तनद्वयम्।**
**एकमापातमधूरमन्यदालोचनामृतम्॥**[2]

सङ्गीतेन श्रवणकाले एव रसानन्दानुभवः साहित्येन स्मारं स्मारं रसानन्दानुभवश्च भवति इति सङ्गीतादि साहित्यस्य श्रेष्ठता। अपि च केवलं नादात्मकात् सङ्गीतादपि साहित्यपूर्णं सङ्गीतम् आस्वद्यतरं भवति।

## ▪ आचार्यसम्पदानन्दमिश्रमहोदयस्य परिचयः

लौकिकसंस्कृतसाहित्ये महर्षिवाल्मीकिः आदिकविरूपेण परिगण्यते तथा तद् विरचितं रामायणं च आदिकाव्यमिति प्रशंस्यते। ततः निरवच्छिन्नधारया सरस्वतीकृपाकटाक्षेक्षिताः कवयः विविधानि काव्यानि संस्कृतभाषया विरचितवन्तः। तानि विरचनानि अधुनापि अस्माकं मानसपटले राराजन्ते। एवं रूपेण भूयान्कालः व्यपगतः। क्रमशः भारतं वैदिककशासनाधीनं जातम्। तस्मिन् काले धूमावृताग्निरिव मेघावृतचन्द्रः इव वा स्वप्रतिभा या कविसमाजे लुक्कायितरूपेण आसीत्, प्रतिबन्धकापगमानन्तरं सा सहृदयजनसमाजे अमराकृतिरूपेण प्रतिभाति।

प्राचीनकाले कविपरम्परा अतिचमत्कारिणी आसीत्। यमक – श्लेषानुप्रासादीनां योजनेन अतिशयोक्ति राजितेन काव्येन कवयः स्वपाण्डित्यं प्रदर्शयन्ति स्म। क्रमशः मेधाशक्तिः वोधशक्तिश्च क्षीणा जाता। संस्कृतस्य परम्परा अपि विच्छिन्ना समभवत्। आङ्ग्लशासनकाले भारते सम्पूर्णरूपेण संस्कृतशिक्षा ध्वस्ता जाता। भारतस्य स्वाधीनतानन्तरं केचन महाप्राणाः विद्वांसः सुरभारतीभाण्डागारं पूरयितुकामाः संस्कृतकाव्यादिकं रचयितुं प्रवृत्ताः जाताः।

एतादृशेषु अर्वाचीनसंस्कृतकविषु अनेके विद्वत्तल्लजाः अस्माकं पुरतः प्रतिभान्ति। तेषु उत्कलप्रदेशे लब्धजन्मा आचार्यसम्पदानन्दमिश्रमहोदयः अन्यतमः। आचार्यसम्पदानन्दमिश्रमहोदयः जुन्मासस्य विंशतिदिनाङ्के 1971 तमे सम्बत्सरे याजपुरजिल्लायाः बालिगुडाग्रामे जनिं लब्धवान्। तस्य पिता भैरवानन्दमिश्रः माता च अक्षयामिश्रेति ज्ञायते।

आचार्यसम्पदानन्दमिश्रमहोदयः कविरूपेण, सहृदयरूपेण, ग्रन्थसम्पादकभावेन, प्रतिष्ठातृरूपेण, उपसभापतिरूपेण, सदस्यरूपेण, निर्देशकरूपेण, संयोजकरूपेण, ग्रन्थनिर्मातृरूपेण, संस्कृतभाषायाः प्रचारप्रसारकरूपेण च न केवलं भारते अपि तु समग्रविश्वे सुविख्यातः।

संस्कृतजगति सम्पदानन्दमिश्रमहोदयः अग्रगण्यविद्वद्रूपेण प्रतिभाति। सः पूर्णरूपेण विश्वसिति यत् संस्कृतमेव मानवानाम् आध्यात्मिकविषयरूपेण स्वीकृतं वर्तते। विषयेऽस्मिन् राष्ट्रियान्तराष्ट्रिययोः स्तरे विभिन्नेषु सत्रेषु साहित्यिकशैल्या धार्मिकसम्मेलनक्षेत्रे तथा च योगशिक्षाक्षेत्रे स्वीयमतं प्रकटीतवान्। श्री अरविन्दस्य प्रशंसक दर्शनशास्त्रवित् मिश्रमहोदयः न केवलं भारते अपि तु समग्रविश्वे विभिन्नेषु कार्यक्षेत्रेषु कार्यनिर्वहणं करोति। तेन वायुतत्त्वविद्रूपेण 2010 सम्बत्सरे ट्रमोडाङ् एवञ्च टवागो इति स्थानं प्राप्तम्, अपि च भाषातत्त्ववित् इति उपाधिना भूषितम्। अनेन 2024 तमे सम्बत्सरे मेन्वरन् इति स्थाने विद्यमाने मोनास् विश्वविद्यालये मुख्यातिथिरूपेण समागत्य चारित्रिकविकासविषये एवञ्च स्वामीविवेकानन्दविषये वक्तृता उपस्थापिता। अयं जनैः सह निविडतया सम्बन्धं संस्थाप्य विद्यालयानां दर्शनशास्त्रविषये, संस्कृतशिक्षकाणाम् अभिभावकरूपेण च विद्यमानः अभवत्।

- **आचार्यसम्पदानन्दमिश्रमहोदयस्य कृतयः**

| क्र. सं | पुस्तकानि | समयः |
|---|---|---|
| 1 | जन्मपूर्ववर्त्तिशिक्षा | 2019 |
| 2 | संस्कृतबालसाहित्यम् | 2018 |
| 3 | शनैः शनैः(बालगीतावली) | 2016 |
| 4 | सप्तवर्णचित्रपतङ्गः | 2016 |
| 5 | देवभाषा | 2014 |
| 6 | वासिष्ठकाव्यकण्ठगणपतिमुनिः | 2004/2011 |
| 7 | छन्दोवल्लरी | 2011 |
| 8 | संस्कृत एण्ड दा इभ्याल्युएसन् आफ् ह्युमान् स्पिच् | 2005 |
| 9 | स्तोत्रावलीः | 2004 |
| 10 | श्री अरविन्दोपनिषद् | 2001 |
| 11 | दा वाण्डर् दाट् इज् संस्कृतम् | 2002 |
| 12 | हास्यमञ्जरी | 2001/2009 |
| 13 | श्री अरविन्द एण्ड् संस्कृतम् | 2001 |
| 14 | दा सेञ्चुरि आफ् लाइफ् दा नीतिशतकम् आफ् भर्तृहरि | 1998 |
| 15 | संस्कृतव्याकरणपरिभाषा शब्दावली | 1997 |
| 16 | बालकथाशतकम् | 2021 |
| 17 | श्रीवाणी | 2021 |
| 18 | दा ऋषि ट्राडिशन् आफ् भारत | 2022 |
| 19 | भक्तसालवेगः | 2022 |
| 20 | किं त्वं स्वमुखं चुम्बितुं शक्नोषि | 2002 |
| 21 | यदा मिलेत् तदा अभिवदेत् | 2022 |
| 22 | सप्तचतुष्टयः | 2007 |

- **विषयोपस्थापनम् –**
- **आचार्यसम्पदानन्दमिश्रमहोदयस्य संस्कृते योगदानम्**

आचार्यसम्पदानन्दमिश्रमहोदयः संस्कृतभाषायाः जिज्ञासु, संस्कृताध्ययने आर्त्तिसंयुक्तश्च। संसकृतभाषा मनुष्याणां ओजः तेजोऽभिवर्धिका, पवित्राध्यात्मिकोन्नतिनां प्रापणे च समर्था इति तस्य विश्वासः। अनेकासु गोष्ठीषु साहित्यधार्मिकमहोत्सवेषु देशीय, आन्तर्जातीयवेदिकासु भारतीयसंस्कृतिं योगविद्यामधिकृत्य प्रचारं कृतवान्। अपरो महान् विशेषोऽयम् अरविन्दयोगिनः मातुश्चाराधकः। तयोः प्रसिद्धरचनाभिः प्रभावितः अरविन्दप्रोक्तं योगमार्गमधिकृत्य बहून् वेदान्तसम्बन्धिनः उपन्यासान् अनेकासु वेदिकासु दत्तवान्।

आचार्यसम्पदानन्दमिश्रमहोदयः स्वयं कविः, बहूनां ग्रन्थानां सम्पादकः, सहस्राधिकानां गोष्ठीपत्राणां समर्पकः, बहूनां गोष्ठीनां स्वयं निर्वाहकः च वर्तते। विदेशेष्वपि वेदिकासु अरविन्दयोगिनः आध्यात्मिकविद्यायाः, भारतीयसंस्कृतेः, संस्कृतभाषायाश्च प्रचारप्रसारं कृतवान्।

- **बालसाहित्यम् –**

बालेषु विज्ञानोत्पादनं महता प्रयासेन साध्यं भवति ते सर्वदा क्रीडासक्ताः पठनपाठनविमुखाश्च भवन्ति। अपि च विद्याभ्यासयोग्यात् वयसः प्रागपि अपेक्षितज्ञानोत्पत्तिः करणीया भवति। एवं बालानाम् अध्यापनं क्लेशकारणं भवति। बालाः निसर्गतया विषयस्य ग्रहणे धारणे च समर्थाः भवन्ति। बाल्ये दृष्टं श्रुतं च वार्धकेऽपि च समर्थाः भवन्ति। ततः बाल्ये एव संस्कारः उत्पाद्यः। “संस्कारजन्यं ज्ञानं स्मृतिः” एवं बाल्ये जातं ज्ञानं सर्वासु वयोऽवस्थासु जीवितमार्गनिर्देशोपकारकं भवति। अपि च बालाः पितरौ गृहे स्थितान् इतरान् ज्यायस: कथाकथनार्थं प्रार्थयन्ते कदाचित् पीडयन्ति च। तदानीं तैः वृद्धैः बाल्ये श्रुताः परम्परागताश्च कथाः कथ्यन्ते। एवं बालसाहित्यस्य परम्परोपदेशः न केवलं भारतवर्षे विश्वेऽस्मिन् बालप्रपञ्चे प्रसिद्ध एव। यदि अद्भुताः कथाः बाल्ये श्रुताः भवन्ति हास्यकथाः वा सर्वदा स्मृतिपथम् अधिरोहन्ति स्मृताभिः ताभिः कथाभिः बालाः विनोदिताः भवन्ति। एवं कुटुम्बे सर्वेषां बालसाहित्यं महदुपकारकं तथाविधं बालसाहित्यं ग्रन्थत्रयरचनेन आचार्यसम्पदाननन्दमिश्रमहोदेयनापि सुसम्पन्नं कृतम्।

- **उपसंहारः**

संस्कृतजगति विद्यमानेषु अर्वाचिनकविषु आचार्यसम्पदानन्दमिश्रः अन्यतमः। तस्य महोदयस्य संस्कृतं प्रति योगदानं नितराम् उत्कृष्टत्वं भजते। अनेन बालानां मनोरञ्जनाय बहूनि पुस्तकानि विराचितानि। एतेन महोदयेन बहूनां ग्रन्थानां संस्कृतानुवादमपि कृतम्। बालकेषु सांस्कृतिकशिक्षायाः सामर्थ्यं सम्पदानार्थम् अयं महोदयः सर्वदा प्रयाशरतः। अतः अस्य योगदानम् अतुलनीयं वर्तते।

- **सन्दर्भग्रन्थसूची**

1) **रसगङ्गाधर** – पण्डितराजजगन्नाथः - चौखम्बासंस्कृतसिरिज, वारणासी,1978।
2) **अमरकोशः**– अमरसिंहः– चौखम्बासंस्कृतविद्यालयः,वारणासी,2012।
3) **साहित्यदर्पण** - विश्वनाथकविराजः - चौखवम्बासंस्कृतसिरिज्, वारणासी, 1989।
4) **संस्कृतसाहित्येतिहास**– आचार्य रामचन्द्रमिश्रः, चौखम्बासंस्कृत सिरिज् आफिस्, वारणासी – 1, 1981.

**पाद टिप्पणी**

1. रसगङ्गाधरः - प्रथमाननम् - पीठिका, पृ. - ६।
2. रसगङ्गाधरः - प्रथमाननम् - पीठिका, पृ. - ८।